# अष्टम-पाठः

## सूक्तिस्तवकः

8.1 वाचनं विवरणं च।

| N. | Voice Over |
|---|---|
| १<br>२ | नमस्कारः।<br>षष्ठकक्ष्यायाः रुचिरा इति पाठपुस्तकस्य अनुशिक्षणे स्वागतम् ।<br>अधुना वयम् अष्टमं पाठं पठामः ।<br>पाठस्य नाम “सूक्तिस्तवकः" इति। |
| | आदौ पाठस्य वाचनं कुर्मः। |
| | बालादपि ग्रहीतव्यं, युक्तमुक्तं मनीषिभिः।<br>रवेरविषये किं न, प्रदीपस्य प्रकाशनम्॥१॥<br>पुस्तके पठितः पाठः, जीवने नैव साधितः।<br>किं भवेत् तेन पाठेन, जीवने यो न सार्थकः॥२<br>प्रियवाक्यप्रदानेन, सर्वे तुष्यन्ति मानवाः।<br>तस्मात् प्रियं हि वक्तव्यं, वचने का दरिद्रता॥३<br>गच्छन् पिपीलको याति, योजनानां शतान्यपि।<br>अगच्छन् वैनतेयोऽपि, पदमेकं न गच्छति॥४॥<br>काकः कृष्णः पिकः कृष्णः, को भेदः पिककाकयोः।<br>वसन्तसमये प्राप्ते काकः, काकः पिकः पिकः॥५॥ |
| | अधुना पाठस्य विवरणम् पश्यामः। |
| ३ | पाठस्य शीर्षकम् अस्ति - सूक्तिस्तवकः इति।<br>सूक्तिः इत्यस्य अर्थः कः इति जानन्ति वा ?<br>सु - उक्तिः = सूक्तिः इत्युक्ते शोभना उक्तिः । अर्थात् उत्तमं वचनम् ।<br>स्तवकः नाम गुच्छम् इत्यर्थः ।<br>अत्र सूक्तिस्तवकः नाम उत्तमवचनानां गुच्छम् इत्यर्थः ।<br>आङ्ग्लभाषायाम् - Bunch of good sayings इति। |
| ४ | इदानीं वयं प्रथमसूक्तिं पठामः । अहं पठामि। भवन्तः अनुवदन्तु। |
| ५ | [अनुवाचनस्य समयः देयः]<br>बालादपि ग्रहीतव्यं<br>... |

| | |
|---|---|
| | युक्तमुक्तं मनीषिभिः।<br>...<br>रवेरविषये किं न<br>..<br>प्रदीपस्य प्रकाशनम् ॥ ....... |
| ६ | श्लोके बहूनि पदानि सन्ति खलु । कानि कानि पदानि सन्ति इति विभज्य पश्यामः । पदविभागः एवम् अस्ति-<br>बालात्, अपि, ग्रहीतव्यम्, युक्तम्, उक्तम्, मनीषिभिः, रवेः, अविषये, किम्, न, प्रदीपस्य, प्रकाशनम्,। |
| ७ | इदानीम् अन्वयं पश्यामः ।<br>• श्लोकेपदानि इतस्ततः भवन्ति। श्लोकार्थः सरलः न भवति।<br>• श्लोकस्यअर्थज्ञानार्थं पदानां पुनः व्यवस्थापनं कुर्मः।तदा वाक्यं सरलं भवति।<br>एवम् “अर्थानुसारं पदानांयोजनम्’ एव - अन्वयः।<br>उदाहरणार्थम् - “नमस्तेस्तु महामाये” इति श्लोकभागस्य अन्ययं पश्यामः - अस्मिन् वाक्ये पदानि इतस्ततः सन्ति। इदानीं पदानां पुनः व्यवस्थापनं कुर्मः।<br>महामाये! ते नमः अस्तु। इति अन्वयः भवति।<br>अर्थात् हे दुर्गे तुभ्यं नमस्कारः अस्तु। इति। |
| | पश्यन्तु, इदानीं अहं प्रथमसूक्तेः अन्वयं दर्शयामि -<br>मनीषिभिः बालात् अपि उक्तं युक्तम् ग्रहीतव्यम् । यतः रवेः अविषये, किं प्रदीपस्य प्रकाशनं न भवति ? |
| ८ | छात्राः! इदानीं सूक्तेः अर्थं जानीमः।<br>सूक्तौ **ग्रहीतव्यम्** इति पदम् अस्ति । ग्रहीतव्यम् इत्यस्य अर्थं जानन्ति वा ?<br>• ग्रहीतव्यम् इत्यस्य अर्थः अस्ति स्वीकर्तव्यम्, अथवा ग्रहणंकर्तव्यम् इति ।<br>• किं ग्रहीतव्यम्?<br>युक्तम् उक्तं ग्रहीतव्यम्।<br>• युक्तमुक्तं नाम किम्?<br>युक्तं नाम योग्यम् । उक्तं नाम वचनम्इत्यर्थः । अतः युक्तमुक्तम् इत्युक्ते योग्यं वचनम् इति अर्थः।<br>• युक्तमुक्तं कस्मात् ग्रहीतव्यम् ?<br>युक्तमुक्तं बालात् अपि ग्रहीतव्यम् । |
| ९ | • बालात् युक्तम् उक्तं कैः ग्रहीतव्यम्?<br>बालात् युक्तम् उक्तं मनीषिभिः अपि ग्रहीतव्यम्।<br>मनीषिभिः अर्थात् विद्वज्जनैः ।<br>अतः **बालादपि ग्रहीतव्यं युक्तमुक्तं मनीषिभिः** इत्युक्ते |

| | |
|---|---|
| | बालाः अपि यदि उत्तमविचारं वदन्ति तर्हि विद्वज्जनैः अपि स्वीकर्तव्यम् इत्यर्थः। |
| | बालः इति उपेक्षा न करणीया । किमर्थम् ?<br>• बालाः अपि योग्यवचनं वदन्ति । वदन्ति खलु ?<br>• तदर्थं श्लोके विद्यमानम् एकम् उदाहरणं पश्यामः । |
| | • रात्रौ सूर्यः न भवति। तदा अन्धकारः भवति।<br>• तदा वयं किं कुर्मः?<br>o दीपस्य प्रकाशनं कुर्मः।सः लघुः दीपः अन्धकारं निवारयति ।<br>• सूर्यस्य अभावे लघुदीपः अपि अन्धकारनिवारणं करोति।<br>• तथैव विद्वज्जनस्य अभावे कदाचित् बालस्य वचनमपि स्वीकारयोग्यंभवति।<br>o अत्र विद्वान्सूर्यसदृशः।<br>o बालः दीपसदृशः । |
| १२ | • अतः सूक्तिः वदति -<br>"रवेरविषयेकिं न प्रदीपस्य प्रकाशनम्।"<br>रवेरविषये इत्यत्र पदविच्छेदः अस्ति - रवेः अविषये।<br>अविषये नाम अभावे इत्यर्थः ।<br>• कस्य अविषये ?<br>रवेः अविषये।<br>रविः इत्युक्ते सूर्यः । रविशब्दस्य षष्ठीविभक्तिः रवेः इति भवति ।<br>सूर्य इत्यस्य षष्ठीविभक्तिः सूर्यस्य इति भवति। अतः रवेः अर्थात् सूर्यस्य इत्यर्थः ।<br>• रवेरविषये अर्थात् सूर्यस्य अभावे इति।<br>सूक्तिः प्रश्नं करोति -<br>रवेरविषये किं न प्रदीपस्य प्रकाशनम्? इति ।<br>• प्रदीपःइत्युक्ते दीपः।<br>• प्रकाशनम् अर्थात् ज्वालनम्, दीपनम्।<br>• यदा सूर्यः न भवति तदा (अर्थात् रात्रौ) दीपस्य प्रकाशनं भवतिकिल ! |
| | इदानीं वयं श्लोकस्य तात्पर्यं पठामः -<br>सूर्यस्य अभावे प्रदीपस्य ज्वालनेन अन्धकारस्य निवारणं भवति ।<br>तथैव दीपसदृशाः बालाः भवन्ति। ते अपि उत्तमविचारं वदन्ति ।<br>अतः बालाः इति उपेक्षा न करणीया । बालानाम् उत्तमविचारः ज्येष्ठैः अपि स्वीकरणीयः इति सूक्तिः वदति। |
| | Meaning - |

| | |
|---|---|
| | Appropriate words from even a child should be considered by the wise people.<br>Does not the light of a lamp show in the absence of the sun? |
| | सूर्य के अभाव में जैसे एक लघु दीपक प्रकाश देता है - वैसे ही बच्चों से भी विद्वान् लोगों को सद्वचन का स्वीकार कर लेना चाहिए। |
| २ | इदानीं वयं द्वितीयसूक्तिं पठामः - अहं पठामि, भवन्तः अनुवदन्तु -<br>{अनुवाचनस्य कालः}<br>पुस्तके पठितः पाठः<br>जीवने नैव साधितः।<br>किं भवेत् तेन पाठेन<br>जीवने यो न सार्थकः |
| ३ | इदानीं श्लोकस्य पदविभागं पश्यामः →<br>पुस्तके, पठितः, पाठः, जीवने, न, एव, साधितः, किम्, भवेत्, तेन, पाठेन, जीवने, यः, न, सार्थकः। |
| | अधुना श्लोकस्य अन्वयं पश्यामः -<br>पुस्तके पठितः [यः] पाठः जीवने नैव साधितः, जीवने सार्थकः न [भवति], तेन पाठेन किं भवेत् ? |
| | एषा सूक्तिः वदति यत् -<br>पुस्तके पठितः पाठः जीवने साधनीयः। अर्थात्<br>• पुस्तके पठितस्य पाठस्य प्रयोगः जीवने करणीयः।<br>• पुस्तके पठितः पाठः जीवने सार्थकः भवेत् ।<br>• सार्थकःअर्थात् अर्थसहितः इत्यर्थः ।<br>• यः पाठः जीवने नैव साधितः, सार्थकः नास्ति, तेन पाठेन कः लाभः अस्ति?<br>• तस्यपाठस्यकोपि लाभः नास्ति ।<br>• पाठस्यसार्थकता आचरणे भवति इति सूक्तिः वदति। |
| ८ | एतस्य एकम् उदाहरणं वदामि श्रुण्वन्तु -<br>• पुस्तकेकिं भवति?<br>    • सत्यंवदतु । वञ्चना न करणीया ।<br>    • राष्ट्रस्यगौरवरक्षणं कर्तव्यम्।<br>    • ज्येष्ठानाम्आदरः कर्तव्यः । इत्यादि उपदेशाः भवन्ति।<br>• यदिवयं जीवने तत् न पालयामः तर्हि ?<br>• पठितस्यपाठस्य प्रयोजनं न भवति इत्यर्थः । |
| | Meaning- |

| | |
|---|---|
| | The lesson studied from the books, never practiced in life, of what use by that study which is not applied in life? |
| | पुस्तक में पढे गए पाठ को अगर जीवन में धारण न किया गया व उपयोग में न लाया तो उस पाठ से क्या लाभ है? |
| | छात्राः, इदानीं तृतीयसूक्तिं पठामः - अहं पठामि, भवन्तः अनुवदन्तु -<br>प्रियवाक्यप्रदानेन<br><br>सर्वे तुष्यन्ति मानवाः।<br><br>तस्मात् प्रियं हि वक्तव्यं<br><br>वचने का दरिद्रता॥ |
| ३ | श्लोकस्य पदविभागं पश्यामः - प्रियवाक्यप्रदानेन, सर्वे, तुष्यन्ति, मानवाः, तस्मात्, प्रियं, हि, वक्तव्यम्, वचने, का, दरिद्रता। |
| ४ | श्लोकस्य अन्वयः एवं भवति - सर्वे मानवाः प्रियवाक्यप्रदानेन तुष्यन्ति । तस्मात् प्रियं हि वक्तव्यं वचने दरिद्रता का ? |
| ५ | • श्लोके क्रियापदं किम् अस्ति ?<br>o तुष्यन्ति इति अस्ति खलु।<br>o तुष्यन्ति इत्युक्तेसन्तोषम् अनुभवन्ति इत्यर्थः।<br>• के तुष्यन्ति ?<br>o सर्वे मानवाः तुष्यन्ति । |
| ६ | • सर्वे मानवाः केन तुष्यन्ति ?<br>o सर्वे मानवाःप्रियवाक्यप्रदानेन तुष्यन्ति ।<br>o अर्थात् सर्वे जनाःमधुरसम्भाषणेन तुष्यन्ति। |
| ७ | • तस्मात् किं कर्तव्यम्?<br>तस्मात् प्रियं वक्तव्यम् ।<br>तस्मात् इत्यस्य अर्थः Therefore, इसलिये, इति।<br>वक्तव्यम् इत्यस्य अर्थः अस्ति should be spoken बोलना चाहिए इति। |

| | |
|---|---|
| ८ | • कुत्र दरिद्रता न भवेत् ?<br>प्रियवचने दरिद्रता न भवेत् ।<br>प्रियवचनम् अर्थात् मधुरवचनम्।<br>दरिद्रता अर्थात् दीनता ।<br>दरिद्रता इत्यस्य अर्थः अस्ति poverty हिन्दिभाषायां कृपणता इति। |
| ९ | अधुना श्लोकस्य तात्पर्यं पश्यामः -<br>सर्वे मानवाः प्रियवचनेन तुष्यन्ति । अर्थात् प्रियवाक्यं श्रुत्वा सर्वे मानवाः सन्तुष्टाः प्रसन्नाः च भवन्ति ।<br>अतः प्रियं वचनं वक्तव्यम्।<br>प्रियवचनानि बहूनि सन्ति। तत्र दरिद्रता नास्ति एव।<br>अतः प्रियवाक्यानि यथेष्टम् उपयोक्तव्यानि । |
| | प्रियवाक्यानि कानि भवन्ति ?<br>• धन्यवादः, स्वागतम्,  कृपया, नमस्कारःइत्यादि-शिष्टाचारवचनानि।.<br>• उत्तमम्, योग्यम्, शोभनम् इति प्रशंसावाक्यानि।<br>• तवकार्यं सम्यक् अस्ति... इत्यादि उत्तमकार्याणां प्रशंसा।<br>• विजयीभव, शुभम् अस्तु....इत्यादि शुभाशयाः। |
| | Meaning-<br>Everybody feels happy by transacting pleasant words. So always utter pleasing words. Why (feel) poverty of words? |
| | मीठे वचन बोलने से सभी आनन्दित होते हैं। इसलिए सदैव प्रियवचन ही बोलना चाहिए। उसमे कैसी दरिद्रता? |
| २ | अधुना वयं चतुर्थसूक्तिं पठामः  -   अहं पठामि, भवन्तः अनुवदन्तु -<br>[अनुवाचनस्य कालः देयः]<br>गच्छन् पिपीलको याति<br><br>योजनानां शतान्यपि।<br><br>अगच्छन् वैनतेयोऽपि<br><br>पदमेकं न गच्छति॥ |

| | |
|---|---|
| ३ | श्लोकस्य पदविभागः एवं भवति → गच्छन्, पिपीलकः, याति, योजनानां, शतानि, अपि, अगच्छन्, वैनतेयः, अपि, पदम्,एकम्, न, गच्छति। |
| ४ | इदानीं श्लोकस्य अन्वयं पश्यामः → पिपीलकः गच्छन् योजनानां शतानि अपि याति, वैनतेयः अगच्छन् एकं पदम् अपि न गच्छति। |
| ५ | श्लोके क्रियापदं किम् अस्ति?<br>• यातिइति क्रियापदम् अस्ति।<br>याति अर्थात् प्राप्नोति इत्यर्थः ।<br>• कःयाति?<br>o पिपीलकःयाति।<br>• कीदृशःपिपीलकः याति?<br>o गच्छन् पिपीलकःयाति।<br>o गच्छन् अर्थात् चलन्इत्यर्थः । |
| ६ | o गच्छन् पिपीलकः किं याति?<br>गच्छन् पिपीलकः योजनानां शतानि अपि याति ।<br>योजनम् इत्युक्ते चत्वारः क्रोशाः (प्रायशः द्वादश किलोमीटर्)<br>योजनानां शतानि अर्थात् Hundreds of Yojanas, बहुदूरम् इत्यर्थः। |
| | o कः पदमेकं न गच्छति?<br>वैनतेयः पदमेकं न गच्छति।<br>वैनतेयः अर्थात् गरुडः इत्यर्थः।<br>पदमेकं  इत्यत्र पदम् एकम् इति शब्दद्वयम् अस्ति ।<br>o कीदृशः वैनतेयः पदमेकं नगच्छति?<br>अगच्छन् वैनतेयः पदमेकं न गच्छति।<br>अगच्छन् नाम 'न चलन्' अर्थात् क्रियारहितः इत्यर्थः। |
| | इदानीम् श्लोकस्य विवरणं पश्यामः -<br>• एषा सूक्तिः कार्यारम्भस्य महत्त्वं दर्शयति ।<br>• एषा सूक्तिः प्रयत्नस्य आवश्यकतां सूचयति ।<br>उदाहरणार्थम्-<br>o लघुपिपीलकः अपिप्रयत्नपूर्वकं गच्छन् शतानि योजनानि (अर्थात् बहुदूरम्) गन्तुं समर्थःभवति।<br>• परन्तु बलशाली वैनतेयः अगच्छन् अर्थात् प्रयत्नंविना एकमपि पदम् अग्रे न गच्छति । |
| | तात्पर्यम् –<br>• अतिसमर्थः अपि यदि कार्यारम्भं न करोति तर्हिकार्यसाधनं न भवति ।<br>• सामान्यः जनः अपि यदि प्रयत्नेन कार्यं करोति तर्हिकार्यसाधनं भवति। |

| | |
|---|---|
| | • अत्र अतिसमर्थस्य उदाहरणं वैनतेयः अस्ति।<br>• सामान्यस्य उदाहरणं पिपीलकः अस्ति। |
| | Meaning -<br>An ant covers hundreds of 'Yojanas' if it keeps moving. A Garuda not venturing does not move even a foot.<br>Even a capable person cannot achieve anything without initiation. But even an ordinary person can reach his goal by his steady effort. |
| | चलती हुई चींटी कोसों दूर पहंच जाती है। और बैठा रहे गरुड एक पग भी आगे नहीं जा सकता। इसी तरह प्रयत्न के बिना समर्थ जन भी कार्यपूर्ति कर नहीं पाता है। एक साधारण मानव भी सतत प्रयत्न से बडे कार्य में सफल हो सकता है। |
| | इदानीं वयं पञ्चमसूक्तिं पठामः - अहं पठामि, भवन्तः अनुवदन्तु।<br>काकः कृष्णः पिकः कृष्णः<br>...<br>को भेदः पिककाकयोः।<br>..<br>वसन्तसमये प्राप्ते<br>..<br>काकः काकः पिकः पिकः॥५॥<br>... |
| ३ | श्लोकस्य पदविभागः एवं भवति - काकः, कृष्णः, पिकः, कृष्णः, कः, भेदः, पिककाकयोः, वसन्तसमये, प्राप्ते, काकः, काकः, पिकः, पिकः। |
| ४ | इदानीम् श्लोकस्य अन्वयं जानीमः - काकः कृष्णः। पिकः कृष्णः। पिककाकयोः कः भेदः? वसन्तसमये प्राप्ते काकः काकः भवति। पिकः पिकः भवति। |
| ५ | • काकस्य वर्णः कः?<br>o काकस्य वर्णः कृष्णः।<br>• पिकस्य वर्णः कः?<br>o पिकस्य वर्णः कृष्णः। |
| ७ | • पिककाकयोः समानः वर्णः अस्ति वा ?<br>सत्यम्, पिककाकयोः समानः वर्णः अस्ति।<br>पिककाकयोः अर्थात् Of cuckoo and crow कोयल और कौओं का इत्यर्थः। |
| ८ | • पिककाकयोः भेदः कदा ज्ञायते ? |

| | |
|---|---|
| | o पिककाकयोः भेदःवसन्तसमये ज्ञायते ।<br>• कथम् ?<br>o काकः कर्कशं रटति । पिकःमधुरं कूजति । |
| ९ | श्लोकस्य विवरणं पश्यामः -<br>• काकस्य वर्णः कृष्णः, पिकस्य वर्णः अपि कृष्णः<br>• परन्तु द्वयोः भेदः कः अस्ति इति वसन्तकाले ज्ञायते।<br>• वसन्तकाले काकः काकः एव भवति। पिकः पिकः एव भवति।<br>• अर्थात् काकः कर्कशं रटति। पिकः मधुरं कूजति।<br>एवमेव |
| | सामान्यतः जनाः सर्वे समानाः भवन्ति।<br>किन्तु केचन जनाः  समर्थाः भवन्ति। प्रतिभावन्तः अपि भवन्ति।<br>किन्तु तेषां वास्तविकं स्वरूपम् अज्ञातं भवति।<br>• कदा तेषां सामर्थ्यस्यप्रकाशनं प्रतिभायाः प्रदर्शनंचभवति?<br>o यदा उत्तमः अवसरः लभ्यते तदा तेषां सामर्थ्यस्य प्रकटनं भवति । |
| | Meaning-<br>Crow is black. Cuckoo is (also) black. What is the difference between cuckoo and crow? On the arrival of the spring, a crow is a crow and a cuckoo is a cuckoo. (Cuckoo sings melodiously). |
| | अनुवाद -<br>कौआ काला होता है। कोयल भीकाली होती है। तो कोयल और कौए में भेद क्या है? वसन्त ऋतु आने पर कौआ होता हैकौआ ; कोयल होती है कोयल ! (कोयल मीठी गाती है । कौआ कर्कश आवाज करता है । तब उनदोनों का भेद खुल जाता है । |
| | अस्मिन् पाठे -<br>• बालवचनस्य प्राधान्यम्इति विषयः प्रथमसूक्तौ<br>• विद्यायाः सार्थकताइतिविषयःद्वितीयसूक्तौ<br>• प्रियवाक्यस्यआवश्यकताइति विषयःतृतीयसूक्तौ<br>• कार्यारम्भस्यमहत्त्वम्इति विषयःचतुर्थसूक्तौ<br>• वास्तविकस्वरूपस्यप्रकाशनम्इति विषयःपञ्चमसूक्तौ<br>पठिताः । |
| | एतावता अष्टमपाठः समाप्तः।<br>पाठस्य अभ्यासभागे पुनर्मिलाम।<br>धन्यवादः। |